International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 94-97
© 2026 IJMH
www.themultijournal.com
Received: 04-07-2026
Accepted: 25-07-2026
Publish : 28-07-2026

**विशाल शर्मा**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
वेदव्यासपरिसरः, बलाहरः।

**Correspondence:**
**विशाल शर्मा**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
वेदव्यासपरिसरः, बलाहरः।

# "षष्ठी शेषे" सूत्रस्य लघुशब्देन्दुशेखरदृशा विमर्शः

**विशाल शर्मा**

**शोधसारः**

षष्ठीविभक्तिः संस्कृतव्याकरणे सम्बन्धबोधिका महत्त्वपूर्णा विभक्तिः अस्ति। सामान्यतः षष्ठीविभक्त्या सम्बन्धस्य बोधो भवति। पाणिनीयव्याकरणे **"षष्ठी शेषे"** इति सूत्रेण षष्ठीविभक्तेः विधानं क्रियते। अत्र 'शेष'शब्देन कारकप्रातिपदिकार्थात् भिन्नः सम्बन्धविशेषः गृह्यते। अतः स्वस्वामिभावः, जन्यजनकभावः, अङ्गाङ्गिभावः, अवयवावयविभावः इत्यादयः विविधाः सम्बन्धाः षष्ठीविभक्त्या प्रतिपाद्यन्ते। व्याकरणशास्त्रे कारकस्य स्वरूपं क्रियाजनकत्वेन अथवा क्रियान्वयित्वेन निरूपितम् अस्ति। किन्तु षष्ठीविभक्तेः साक्षात् क्रियया अन्वयः न भवति, अतः सामान्यतः षष्ठी कारकविभक्तिषु न परिगण्यते। मीमांसकानां मते यथा धात्वर्थस्य भावनायाम् अन्वयः भवति, तथैव सुबर्थस्यापि भावनायां प्रकारतया अन्वयः स्वीक्रियते। अतः षष्ठ्यर्थस्य सम्बन्धस्यापि भावनायाम् अन्वयः सम्भवति। सम्बन्धे षष्ठीविभक्तेः शक्तिः इति तेषां मतम्। नैयायिकदर्शने तु सम्बन्धः सर्वत्र क्रियाकारकभावमूलकः स्वीक्रियते। **"राज्ञः पुरुषः"** इत्यादौ स्वस्वामिभावसम्बन्धोऽपि क्रियाकारकभावपूर्वक एव भवति। राजा पुरुषाय वेतनादिदानेन स्वामित्वं प्राप्नोति इत्यादिरूपेण सम्बन्धस्य क्रियामूलकत्वं नैयायिकैः प्रतिपाद्यते। महाभाष्यकारेण षष्ठीविभक्तेः सम्बन्धार्थकत्वस्य व्यापकता प्रदर्शिता अस्ति। स्वत्वादिसम्बन्धविशेषाणां विचारं कुर्वता भाष्यकारेण **"एकशतं षष्ठ्यर्थाः"** इति कथनमपि कृतम्। तेन षष्ठीविभक्तेः सम्बन्धबोधकत्वस्य व्यापकता स्पष्टतया ज्ञायते।

अतः षष्ठीविभक्तेः स्वरूपं केवलं स्वामित्वसम्बन्धे सीमितं न भवति, अपि तु विविधसम्बन्धानां बोधनाय तस्याः व्यापकः प्रयोगः दृश्यते। प्रस्तुतविषये षष्ठीविभक्तेः अर्थः, कारकत्वसम्बन्धः, मीमांसक-नैयायिकमतयोः तुलनात्मकविवेचनम्, **"षष्ठी शेषे"** इति सूत्रस्य स्वरूपम्, शेषपदार्थस्य व्याख्या तथा षष्ठीविभक्तेः विभिन्नाः प्रकाराः इत्येतेषां क्रमबद्धतया अध्ययनं क्रियते। एतादृशेन विश्लेषणेन संस्कृतव्याकरणे षष्ठीविभक्तेः वास्तविकं स्वरूपं, तस्याः अर्थशक्तिः तथा सम्बन्धबोधे तस्याः महत्त्वं सम्यक् अवगन्तुं शक्यते।

**कूटशब्दाः**
षष्ठी, शेषः, सम्बन्धः, क्रिया, कारकम्, सूत्रम्।

## प्रस्तावना

षष्ठीविभक्तेः सम्बन्धमात्रमर्थः। एतत् षष्ठी शेषे[1] इति सूत्रात् लभ्यते। कारकप्रातिपदिकार्थभिन्नः स्वस्वामिभावादिसम्बन्धं एव षष्ठ्याः अर्थः। क्रियाजनकत्वं कारकत्वम्। क्रियान्वयित्वं कारकत्वं वा। षष्ठीविभक्तेः साक्षात्क्रियान्वयाभावात्कारकत्वं नास्ति। मीमांसकानां मते धात्वर्थस्य यथा भावनायामेवान्वयः, तथैव सुबर्थस्य अपि भावनायामेव प्रकारतयान्वयो भवति। अतः षष्ठ्यर्थेऽपि भावनायामन्वेति। सम्बन्धे षष्ठ्याः शक्तिः।

नैयायिकानां मते सर्वत्रैव सम्बन्धः क्रियाकारकभावमूलकः। राज्ञः पुरुषः इत्यत्र स्वस्वामि-भावसम्बन्धोऽपि क्रियाकारकभावपूर्वक एव। यतो हि राजा पुरुषाय वेतनदानेन तस्य स्वामी भवतीत्यर्थकं भाष्यमेवात्र प्रमाणम्। विशेषरूपं स्वत्वादिसम्बन्धमुररीकृत्य एकशतं षष्ठ्यर्थाः इति

भाष्यकारेणोक्तम्। ततः यावन्तो वा सन्तीति उक्तम्। अनेन ततोऽपि अधिकसम्बन्धार्थकत्वं षष्ठ्याः अवगम्यते। षष्ठीविभक्तेः चत्वाराः भेदाः सन्ति। यथा शेषे षष्ठी, प्रतिपदविधाना षष्ठी, कारकषष्ठी , उपपदषष्ठी। षष्ठी शेषे इति सूत्रेण या षष्ठीविभक्तिः विधीयते। सा शेषे षष्ठीत्युच्यते। षष्ठी शेषे इति विधिसूत्रम्। अनेन सूत्रेण षष्ठीविभक्तिः भवति। षष्ठी प्रथमान्तं। शेषे प्रथमान्तं पदम्। उक्तादन्यः अर्थः शेषः, यत्रार्थे विशेषसूत्रैः न काचन विभक्तिः निर्दिष्टाः तत्रार्थे षष्ठी शेषे इति षष्ठीविभक्तिः भवति। शेषपदार्थश्च प्रकृते सम्बन्धो यत्र काचन विभक्तिः अन्येन सूत्रेण न विहिता तत्र सम्बन्धप्रतियोगिवाचकात् षष्ठी। तथा च कारकप्रातिपदिकार्थ-व्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः तत्र षष्ठी स्यादिति सूत्रार्थः प्रतिपादितः दीक्षितेन।[2]

**उक्तादन्यः शेषः इति नागेशेनोक्तम्।**[3]

महाभाष्ये शेषशब्दस्य लक्षणद्वयं प्राप्यते।

**कर्मादिभ्यः येऽन्येऽर्थाः सः शेषः अपरञ्च कर्मादीनामविवक्षा शेषः।**[4]

कर्मादिभ्यो येऽन्येऽर्थाः स शेषः अस्य आशयः शेषशब्दोऽन्यवाची तस्य प्रतियोग्याकाङ्क्षायामुपस्थितकर्मादय एव ग्रहणं भवति। अत्र अन्येऽर्थाः नाम स्वस्वामिभावादयः सम्बन्धाः स्वीकृताः। यतो हि भर्तृहरिणा उक्तम् -

**सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः**
**श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते।**[5]

अत्र अश्रुतायां क्रियायामित्यस्य उदाहरणम्- राज्ञः पुरुषः। राज्ञः पुरुषः इत्यत्र क्रियाकारकसम्बन्धपूर्वकोऽन्य एव स्वस्वामिभावः सम्बन्धोऽवगम्यते। श्रुतायां क्रियायामित्यस्य उदाहरणम् - मातुः स्मरति। अत्र श्रूयमाणे क्रियाशब्देऽपि कर्मत्वस्य अविवक्षितत्वात् षष्ठी भवति। तथा च मातृसम्बन्धि बोधो भवति। वस्तुतः अस्मिन् लक्षणे महाभाष्यकारस्य रुचिः नास्ति। यतो हि क्रियां विना सम्बन्धस्याभावात् सर्वत्र क्रिया आवश्यकी। एवञ्च क्रियानिमित्तस्य कर्मादेः भानम् अत्र । यथा– राज्ञः पुरुषः इत्यादौ राजा कर्ता, पुरुषः संप्रदानम्। यतो हि राजा पुरुषाय ददातीति बोधो भवति। चतुर्भिः प्रकारैः स्वत्त्वं भवति। यथा -क्रयणात्, अपहरणात्, याञ्चायाः,विनिमयाच्च। यथा देवदत्तस्य वस्त्रम्। अत्र देवदत्तः स्वामी, वस्त्रम्- स्वम्। देवदत्तस्य चतुर्भिः प्रकारैः स्वत्त्वमुत्पद्यते। तथा च देवदत्तः वस्त्रं क्रीणाति। अपहरति, याचते अथवा विनिमयति। एवञ्च सर्वत्र देवदत्तः कर्ता। इत्थं सर्वत्र कर्मादयः सन्ति। अतः एतत् लक्षणं न युक्तम्।

**कर्मादीनामविवक्षा शेषः** -क्रियाकारकभावमूलकस्वस्वामिभावादेः सम्बन्धत्वेन विवक्षायां क्रियाकारकभाव- सम्बन्धस्याविवक्षा। सतोऽपि अविवक्षा भवति। यथा अनुदरा कन्या इति। यदा राज्ञः सत्त्वविवक्षा तदा राजपदादेव षष्ठी। राज्ञः पुरुषः। यदा पुरुषस्य स्वत्त्वविवक्षा तदा पुरुषपदात् षष्ठी। पुरुषस्य राजा। तदुक्तं हरिणा-

**द्विष्ठोऽप्यसौ परार्थत्वाद गुणेषु व्यतिरिच्यते।**[6]

सम्बन्धस्य द्विष्ठत्वम्, सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः। यथा घटवद्भूतलमित्यत्र घटभूतलयोः संयोगः सम्बन्धः। सम्बन्धिभ्यां प्रतियोग्यनुयोगिभ्यां भिन्नः द्विष्ठः घटभूतलोभयनिष्ठः, घटाश्रयः भूतलमिति विशिष्ट-बुद्धिनियामकम्।

विशेषणवाचकषष्ठी यद्यसौ सम्बन्धः द्विष्ठः, तथापि अन्यं प्रति गुणानां विशेषणत्वात् विशेषणत्वेन

विवक्षितस्य सम्बन्धं विना विशेषणत्वं न सम्भवति। एवञ्च सम्बन्धं उद्भुततया प्रतीयते। अतः विशेषणवाचकात् पदादेव षष्ठी। विशेष्यस्य तु केवलस्य स्वरूपत एव प्रतीत्या उद्भूतसम्बन्धो नास्ति। अतः विशेष्यवाचकपदात् न षष्ठी। अतः राज्ञः पुरुषः इत्यत्र राजन् शब्दात् षष्ठी न पुरुषशब्दात्। सम्बन्धस्य एकत्वात् एकत्र सम्बन्धिन उत्पद्यमानया षष्ठ्या उक्तत्वात् द्वितीयसम्बन्धिनः षष्ठी न भवति। एकस्मात् विधीयमाना षष्ठी विशेषणादेव भवति। विशेष्यवाचकात् पदात् षष्ठीविधाने तु प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्रधानमिति न्यायस्य विरोधः स्यात्। राज्ञः पुरुषः इत्यत्र प्रत्ययार्थस्य स्वत्वस्य पुरुषप्रकृत्यर्थं प्रति अप्रधानत्वात् (विशेषणत्वम्)। अत्र विशेष्यत्वात् पुरुषस्य प्राधान्यम्। विशेषण-त्वात् राज्ञः अप्राधान्यम्। एवञ्च विशेषणस्य परार्थत्वात् शेषभाव इति ततः षष्ठी भवति। विशेष्यत्वात् प्रथमैव।

अथवा उपपदविभक्तेः कारकविभक्तिर्बलीयसी इत्यनया परि-भाषया प्रथमाविभक्तिः उपपदविभक्तिं षष्ठीं बाधते।

शेषष्ठ्याः सम्बन्धवाचकात् शेषषष्ठ्याः क्वचित् सम्बन्ध-सामान्यरूपेण सम्बन्धवाचकता। यथा- मातः स्मरति इत्यादौ। क्वचित् विशेषरूपेण स्वत्वादिना सम्बन्धवाचकता। यथा राज्ञः पुरुषः इति। सर्वत्र सम्बन्धसामान्येन बोधकत्वे तु चैत्रेण रक्षिते मैत्रीयहस्त्यादौ नेदं चैत्रस्य धनम् इति प्रयोगः संगच्छते। स्वत्त्वत्वेन स्वत्वस्य भाने तु चैत्रीयषाल्यपालकभावसम्बन्धस्य सत्त्वेऽपि तस्य स्वत्वसम्बन्धो नास्ति। अतः षष्ठी निषिध्यते। अन्यथा चैत्रसम्बन्ध-स्यापि हस्त्यादौ सत्त्वात् षष्ठीनिषेधः नोपपद्यते। यदि केवलं स्वत्त्वादिना सम्बन्धवाचकता स्वीक्रियते, तदा मम हस्त इत्यत्र सत्त्वत्त्वेन अवयवत्वेन बाधो न भवति। अतः सम्बन्ध-सामान्यरूपेणापिसम्बन्धवाचकता स्वीक्रियते। अतः स्वत्त्वादिव्या-पकधर्मेण सम्बन्धत्वेन भासमानः स्वत्त्वादिरपि शेषः।

राज्ञः पुरुषोऽस्ति इति वाक्यस्य श्रवणानन्तरं पुरुषः राजस्वत्ववान् न वेति सन्देहो न जायते। अतः सम्बन्धस्य विशेषरूपेण वाच्यता कल्पते। एवञ्च राज्ञः पुरुषः इति वाक्यस्य श्रवणानन्तरं राजसम्बन्धी न वेति सन्देहो न भवति। अतः सामान्येन सम्बन्धत्वेन रूपेण वाच्यता कल्प्यते।

सम्बन्धः क्रियाकारकभावमूलकः सम्बन्धश्च सर्वत्र क्रियाकारकभा-वमूलकः। क्रियाकारकभाव-क्रियाकर्तृत्वभाव- क्रियाकर्मभावादिमूलं यस्येत्यर्थः। तत्र उपकार्योपकारकभाव-प्रकृतिविकृतिभावादिरूपे सम्बन्धे विवक्षिते क्रियाजनकत्वसमानाधिकरणकर्तृत्वकर्मत्वादि-रूपेण च अविवक्षिते षष्ठी विधीयते। अर्थात् कर्तृत्वादेः सम्बन्धत्वेन विवक्षिते षष्ठी। तथा च ब्राह्मणाय ददातीत्यत्र उपकार्योपका-

रकभावसम्बन्धविवक्षायां ब्राह्मणस्य ददाति इति षष्ठी भवति। अत्र ब्राह्मणविशिष्टं दानिमित्यर्थः। एवञ्च काष्ठं भस्म करोति इत्यत्र प्रकृतिविकृतिभावसम्बन्धविवक्षायां काष्ठविशिष्टं भस्म करोतीत्यर्थे काष्ठस्य भस्म करोति इति प्रयोगः साधुः।

अत एव कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः इति सिद्धान्तकौमुद्यां लिखितमस्ति।

**षष्ठीवाच्यः सम्बन्धः**

षष्ठी वाच्यः सम्बन्धः स्वत्त्वं स्वामित्वं वेति प्रश्नः समुदेति। प्राचीननैयायिकानां मते स्वामित्वं सम्बन्धः। नव्यनैयायिकानां मते स्वत्वं सम्बन्धः। यदि स्वामित्वं सम्बन्धः स्वीक्रियते तर्हि स्वत्त्वस्य राजवृतित्वाभावात् सम्बन्धः कल्पयितुं न शक्यते। यदि स्वामित्वं सम्बन्धः इति पक्षः अङ्गीक्रियते। तर्हि स्वामित्वसाधेयतासम्बन्धेन राजादौ वर्तते। किन्तु पुरुषे नास्ति। अतः सम्बन्धः न स्वत्वं नापि स्वामित्वमिति। वैयाकरणानां मते तु स्वत्त्वस्वामित्वसमूहात्मकः सम्बन्धः। यतः सम्बन्धः द्विष्ठो वर्तते।

**सम्बन्धस्य संसर्गविधया भानम्**

सम्बन्धस्य संसर्गतया ज्ञानं भवति। प्रकारतया वेति जिज्ञासा भवति। नागेशभट्टस्य मते सम्बन्धस्य संसर्गविधया ज्ञानं भवति। नैयायिकानां मते तु प्रकारतया भानं भवति। षष्ठ्यर्थस्य संसर्गत्वे लाघवं भवति। यतो हि स्वस्वामिभावसम्बन्धेन राजविशिष्टः पुरुषः इति बोधो भवति। तत्र सम्बन्धः आकाङ्क्षया भासते न पदार्थान्तरमपेक्ष्यते। अतः बोधे लाघवं भवति। प्रकारतावादिमते तु षष्ठ्याः सत्त्वमर्थः। तत्र राज्ञः निरूपितत्वसम्बन्धेनान्वये सम्बन्धेनान्वये सम्बन्धद्वयस्य कल्पनात् गौरवं भवति। भाष्यकारस्य मतेऽपि षष्ठ्यर्थस्य संसर्गमर्यदया भानं भवति , राज्ञः पुरुषः इत्यत्र राजा विशेषणं पुरुषः विशेष्यः इत्युक्तं षष्ठी शेषे इति सूत्रे भाष्ये। सम्बन्धस्य प्रकारत्वे तु सम्बन्धं विशेष्यतया विशेषणतया वा ब्रूयात्।

**कर्मादीनामपि सम्बन्धविवक्षायां षष्ठी**

सिद्धान्तकौमुद्यां कर्मादीनामपि सम्बन्धविवक्षायां षष्ठी भवतीति उक्तम्। आदिपदेन कर्तुरपि ग्रहणं भवति। यतः कस्य वर्तमाने इति सूत्रभाष्ये छात्रस्य हसितमिति प्रयोगः दृश्यते। क्रियाकर्मत्वादिना बोधस्थले क्रियाकारकभावसम्बन्धस्यापि सत्त्वात् तत्र द्वितीया न स्यादिति मनसि निधाय यद्वा क्रियाकारकभावमूलकसम्बन्धस्यैव विवक्षायां न तु तद्विविक्षायामिति नागेशेनोक्तम्। अर्थात् क्रियाकारकभावमात्रस्य विवक्षायां न षष्ठी। अपि तु क्रियाकारकभावेन साकं सम्बन्धितया विवक्षायामेव सतां गतम् इति प्रयोगस्योपपतिः भवति। इदं वचनं न्यायसिद्धं नापूर्वम्।

आधारस्य सम्बन्धविधया विविक्षाभावः, संयोगसम्बन्धविशिष्टाधाराधेयस्थले सम्बन्धविधया विवक्षा न भवति। तदस्यास्त्यस्मिन्निति सूत्रमत्रार्थे प्रमाणम्। अत्र अस्येति पदात् पृथक्पदस्य उपदेशः कृतः सूत्रकृता। अन्यथा अधिकरणस्य सम्बन्धविवक्षायां षष्ठी विभक्तिः स्यात्। अतः केवलं अस्य पदोपदेशमात्रे कार्यं सम्भवति। अतः अस्मिन्निति पदोपदेशं व्यर्थीभूय ज्ञापयति यत् संयोगसंबन्ध- विशिष्टाधारस्य सम्बन्धतया विवक्षा न भवति। घटाः सन्ति अस्मिन् इति विग्रहे घटवत्प्रयोगसाधानप्रसङ्गे तदस्यास्त्यस्मिन्निति सूत्रे भाष्ये स्पष्टम्।

**लोहितोष्णीषा इत्यादौ षष्ठ्यर्थे बहुव्रीहिः न स्यादिति शङ्का**

आधारस्थले षष्ठ्यन्तविवक्षाया अभावात् षष्ठ्यर्थे बह्व्रीहिः न स्यात्। अर्थात् लोहितो उष्णीषा येषान्ते इति विग्रहे लोहितोष्णीषा इति प्रयोगो न भवति। यतो हि यस्य शिरोभागेलोहितोष्णीषा वर्त्तते। इत्यत्र आधाराधेयभावो वर्त्तते। अत्र सम्बन्धविवक्षया येषां इति विहिता। परन्तु षष्ठी न स्यादिति शङ्का।

अत्र समाधानं वस्तुतः अत्र षष्ठ्याः विवक्षा न विहिता। लोहिता उष्णीषा येषु ऋत्विक्षु इति विग्रहे सप्तम्यन्ततया प्रयोगे लोहितोष्णीषाः इति प्रयोगस्योपपतिर्भवति।

**सूत्रस्योदाहरणम्**

**सतां गतम्-** सद्भिः गमनमिति वाक्यमासीत्। गमनक्रियायाः कर्ता भवति सत्(सज्जनः)।अत्र कर्तुरनुक्तत्वात् अनुक्ते कर्तरि तृतीया भवति। सम्बन्धविवक्षायां सम्बन्धसामान्ये षष्ठी भवति। एवञ्च सतां गतम् इति प्रयोगो भवति। सत्पुरुषसम्बन्धिगमनमित्यर्थः। सन्तो गच्छन्ति इत्यत्र आख्यातेन कर्तुः उक्तत्वात् सम्बन्धमात्रविवक्षा कर्तुं न शक्यते।

**सर्पिषो जानीते -** सर्पिषो जानीते इति वाक्ये सर्पिः करणम्। सर्पिशा भोजने प्रवर्तते। अतः करणे तृतीया प्राप्ता। परन्तु करणस्य सम्बन्धत्वेन विवक्षायां षष्ठी भवति। सर्पिः सम्बन्धिप्रवर्तनमित्यर्थः।

**मातुः स्मरति -** मातरं स्मरति इति वाक्ये मातरमिति कर्मपदम्। अतः अनुक्ते कर्मणि द्वितीया प्राप्ता । परञ्च कर्मणोऽविवक्षायां सम्बन्धत्वे च विवक्षायां षष्ठी भवति। मातृसम्बन्धिस्मरण इत्यर्थः।

**एधोदकस्य उपस्कुते**

एधाश्चोदकश्चेति समाहारे द्वन्द्वे एधोदकमिति। अथवा एधांसि च दकश्चेति विग्रहे समाहारे एधोदकमिति। उदकपर्यायी दकशब्दोऽपि वर्तते। एधशब्दः अदन्तः पुंलिङ्गः। अतः एधः कर्ता। अतः भाष्ये एधाः पक्ष्यन्ते इति पुलिङ्गान्तस्य प्रयोगो दृश्यते। एधशब्दः उपस्करणस्य कर्ता। एधश्शब्दः सान्तः क्लीबोऽपि। अतः एधः कर्तृ। अत्र सम्बन्धत्वेन विवक्षायां एधोदकस्य इति षष्ठी।

**भजे शम्भोश्वरणयोः**

शम्भोः चरणौ भजे इति वाक्ये चरणौ इति कर्मपदम्। अतः अनुक्ते कर्मणि द्वितीया प्राप्ता। परन्तु कर्मणः सम्बन्धविवक्षायां चरणयोः इति षष्ठी भवति। शङ्करसम्बन्धिचरणसम्बन्धिभजनमित्यर्थे षष्ठी।

**फलानां तृप्तः**

फलैः तृप्तः इति वाक्ये फलैरिति करणम्। अतः करणे तृतीया प्राप्ता। परन्तु करणस्य अविवक्षायां सम्बन्धत्वेन विवक्षायां षष्ठी भवति। करणफलानां सम्बन्धत्वेन विवक्षायां बहुत्वविशिष्टफलसम्बन्धिनी या तृप्तिः तस्याः आश्रयः इत्यर्थः।

**उपसंहार**

'षष्ठी शेषे' इति पाणिनीयसूत्रस्य विवेचनात् ज्ञायते यत् षष्ठीविभक्तेः प्रयोगः केवलं सम्बन्धमात्रबोधकः न भवति, अपितु

अन्यविभक्ति-विधानस्य प्रसक्तौ तस्य बाधे शेषत्वेन षष्ठीविभक्तिः विधीयते। अनेन सूत्रेण षष्ठीविभक्तेः व्यापकः प्रयोगक्षेत्रः निर्धारितः भवति।

लघुशब्देन्दुशेखरे नागेशभट्टेन अस्य सूत्रस्य सूक्ष्मतया विवेचनं कृतं वर्तते। पूर्वविहितविभक्तेः अभावे, अथवा अन्यविभक्तिविधानस्य अप्रवृत्तौ, सम्बन्धविशेषस्य द्योतने षष्ठीविभक्तिः शेषत्वेन प्रवर्तते। अतः 'षष्ठी शेषे' इति सूत्रं शेषषष्ठीविधानस्य मूलाधाररूपेण स्वीक्रियते।

व्याकरणशास्त्रीयदृष्ट्या अस्य सूत्रस्य महत्त्वं विशेषतः तत्र दृश्यते यत्र कारकविभक्तीनां प्रत्यक्षविधानं न भवति, किन्तु पदयोः परस्परसम्बन्धः विद्यमानः भवति। तादृशे स्थले सम्बन्धस्य अभिव्यक्त्यर्थं षष्ठीविभक्तेः प्रयोगः भवति। अतः पाणिनीयव्याकरणे षष्ठीविभक्तेः प्रयोगव्यवस्थां सम्यगवगन्तुं 'षष्ठी शेषे' सूत्रस्य ज्ञानम् अत्यावश्यकम्।

**सन्दर्भग्रन्थसूची-**


- *पाण्डेय गोपालदत्त 2008. अष्टाध्यायी । वाराणसी: चौखम्बा सुरभारती प्रकाशन।*
- *अभ्यङ्कर के. वी 2006. व्याकरणमहाभाष्यम् । पुणे: भाण्डारकर ओरिएण्टल रिसर्च इन्स्टिट्यूट।*
- *चतुर्वेदी गिरिधर शर्मा एवं शर्मा परमेश्वरानन्द 2008. वैयाकरणसिद्धान्तकौमुदी । वाराणसी: मोतीलाल बनारसीदास।*
- *पञ्चोली बालकृष्ण 2007. लघुशब्देन्दुशेखरः। वाराणसी: चौखम्बा संस्कृत प्रतिष्ठान।*
- *शर्मा काशीनाथ 2010. पाणिनीयव्याकरणे कारकप्रकरणम्। वाराणसी: चौखम्बा सुरभारती प्रकाशन।*
- Joshi, S. D., & Roodbergen, J. A. F. 1986. Patañjali's Vyākaraṇa-Mahābhāṣya: Kārikā and Bhāṣya. Pune: University of Poona.
- Kielhorn, F. 1880–1885. The Vyākaraṇa-Mahābhāṣya of Patañjali. Bombay: Government Central Press.


**सन्दर्भ**

1. अष्टाध्यायी 2.3.50
2. वैयाकरणसिद्धान्तकौमुदी
3. लघुशब्देन्दुशेखरः
4. महाभाष्यम्
5. वाक्यपदीयम् श्लोकः -1.156
6. वाक्यपदीयम् श्लोक -1.157